International Journal of Sanskrit Research 2019; 5(1): 72-74

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 72-74
© 2019 IJSR
www.anantaajournal.com
Received: 07-11-2018
Accepted: 21-12-2018

**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

# कातीयवेदव्रतानां निरूपणम्

## S Sitarama Rao

**प्रस्तावना:**

**उपोद्घातः**

वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेत्[1] ॥ इति

याज्ञवल्क्योक्तवचनानुसारेण तथा च अष्टाचत्वारिंशद्वर्षाणिब्रह्मचर्यंचरेत्[2] इति गृह्यवचनात्द्वादशकेऽप्येके[3] इति वचनाच्चउपनयनन्तरंशुभेसुमुहूर्तेवेदारम्भपूर्वकंशौचाचारान्ब्रह्मचर्यव्रतपूर्वकं यथा योग्यंशिक्षयेत् इति ज्ञायते ।

**मुहूर्तविचारः**

अप्रसुप्तेहरौसस्यान्नानध्यायेशुभेऽहनि ।
नास्ताङ्गतेजीवसिते बाले वृद्धेमलिम्लुचे ।
षष्ठींरिक्तां शनि सोमंहित्वोत्तरोडुषु ।
मृगादिपञ्चधिष्ण्येषुमूलाश्विन्योःकरत्रये ।
पूर्वासुतिसृषूपेन्द्रभत्रयेकेन्द्रगैःशुभैः[4] ॥

इति कारिकाश्लोकाणांवचनानुसारेणचन्द्रतारानुकूल षष्ठी रिक्तादिवर्जिते काले मृगादिशुभनक्षत्रेषु-शुभलग्नेषुव्रतादेशं नाम वेदारम्बादिक्रियाःकार्याः इति ज्ञायते ।

**संस्कारस्वरूपम्**

मातृपूजापूर्वकंआभूदयिकश्राद्धंकृत्वा, विधिवत् अग्निंप्रतिष्ठाप्य, ब्रह्मोपवेशनादिआज्यभागान्तंकृत्वा, यजुर्वेदव्रतादेशंकरिष्यमाणःअन्तरिक्षायस्वाहेत्यादिअनुमतयपर्यन्तंआहुतीःहुत्वाप्रायश्चित्ताहुतींश्चदद्यात् । संस्रवप्राशनदक्षिणादानान्तं कर्म परिसमाप्य, विघ्नेश-सरस्वती – हरि –

लक्ष्म्यादीन्नत्वावेदारम्भंप्रारभेत् । प्रत्येकंऋग्वेदारम्भंकुर्वाणः विशेषेणपृथिव्यैअग्नये च आहुतिप्रदानंभवति, सामवेदारम्भंकुर्वाणः दिवे–सूर्यायआहुतिप्रदानम्, अथर्ववेदारम्भंकुर्वाणःदिग्भ्यःचन्द्रमसे च आहुतिप्रदानंआचरणीयम् । ततः कर्म समापनादिविधानानिकार्याणिभवन्ति । गर्गमतेपञ्चव्रतादेश-विधानानिअभिव्यक्तानिभवन्ति । यथा –

१. सावित्रव्रतादेशः, २. आग्नेय व्रतादेशः ३ शुक्रियव्रतादेशः ४. उपनिषत् व्रतादेशः ५. शौलभव्रतादेशः इति । अथुनाव्रताणांविवरणंकिञ्चित्विशदीकुर्मः

**सावित्रीव्रतादेशः**

माणवकेनतत्सवितुरित्यनेनमन्त्रेणसन्ध्योपासनान्तेअग्निपरिचरणंत तः विधिवत् व्रतादेशाङ्गवेदाहुतीःहुत्वासद्यस्कालएवव्रतविसर्गमपि विधिवत् कार्यम् ।

**आग्नेयव्रतादेशः**

अथअग्नेयव्रतस्थितो ब्रह्मचारी समिधाऽग्निंदुवस्वेत्येवमाद्याग्नेय-वेदविभागंसंवत्सरपर्यन्तंपठित्वाव्रतमुत्सर्गं विधिवत् कुर्यात् ।

**शुक्रियव्रतादेशः**

शुक्रियवेदव्रतस्थित ब्रह्मचारी ऋचंवाचमित्यादिशुक्रियवेद-विभागंपठनंसंवत्सरंयावत्, तदनन्तरंउत्सर्गं विधिवत् कार्यम् ।

**उपनिषत्व्रतादेशः**

औपनिषदेव्रतेस्थितःब्रह्मचरीप्राजापत्याइत्याद्यौपनिषदवेदविभागंसं वत्सरंयावत्पठनम्, तदनन्तरंउत्सर्गःकार्यः ।

**शौलभव्रतादेशः**

शौलभव्रतेस्थितः ब्रह्मचारी शौलभीनांऋचांसंवत्सरंयावत्प-ठनंकार्यम् । ततःउत्सर्गःकार्यः ।

**गोदानव्रतादेशः**

गोदानव्रतमपिसंवत्सरंयावत्आचरणीयम् । संवत्सरेपूर्णेगोदान-व्रतविसर्गःकार्यः । अस्मिन्व्रतेत्रिष्ववगुण्ठनंशुक्रियादिष्विति-परिशिष्टोक्तसूत्रात्अवगुण्ठन्यादीनामभावः ।

**पदार्थनिरूपणम्**

अस्मिन्व्रतादेशेआज्य–चरुद्रव्याणिविहायविशेषेणअन्यत्द्रव्य-जातंनास्तीतिगम्यते ।

**उपसंहारः**

विधिवत् व्रतादेशआचरणेनवेदारम्भअधिकारं प्राप्य ब्रह्मचर्य पालनेनअध्ययनेन च देव – भूत – पितृ –मनुष्याःप्रीतोः भूत्वास्ववाञ्छितकामादीन्दद्युरितिगम्यते, तथा मरणानन्तरं विशिष्ट स्वर्गादिप्राप्तिः अपि लभ्यते इति स्मृत्युक्तवचनात्ज्ञायते । यथा –

अनेनविधिनादेहंसादयन्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः[5]

**अध्ययनफलम्याज्ञवल्क्यस्मृतौ एवं भवति । यथा** –

यज्ञानांतपसांचैवशुभानांचैवकर्मणाम् ।
वेद एवद्विजातीनांनिश्रेयसकरःपरः ॥
मधुनापयसाचैव स देवांस्तर्पयेद्विजः ।
पितृन्मधुघृताभ्यां च ऋचोऽधीते च योऽन्वहम् ॥
यजूंषिशक्तितोऽधीतेयोऽन्वहं स घृतामृतैः ।
प्रीणातिदेवानाज्येनमधुना च पितृंस्तथा ॥
स तुसोमघृतैर्देवांस्तर्पयोद्योऽन्वहंपठेत् ।
सामानितृप्तिंकुर्याच्चपितृणांमधुसर्पिषा ॥
मेदसातर्पयेद्देवानथर्वाङ्गिरसःपठन् ।
पितृंश्चमधुसर्पिभ्यामन्वहंशक्तितोद्विजः ॥

तेतृप्तास्तर्पयेन्त्येनंसर्वकामफलैःशुभैः ।

यंयंक्रतुमधीयी च तस्यतस्याप्नुयात्फलम् ॥

त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते ।

तपसश्चपरस्येहनित्यंस्वाध्यायवान्द्विजः[6]॥

श्रौत–स्मार्ताणांकर्मणांतपसां च अवबोधकत्वेन वेद एवद्विजातीनांउत्तमःभवति। यःअन्वहंऋचोधीते स मधुनापयसा च देवान्पितृंश्चमधुघृताभ्यांतर्पयति । यः पुनः शक्तितोऽन्वहंय-जूंष्यधीते स घृतामृतैर्देवान्पितृंश्चमधुसर्पिभ्यांतर्पयति । यस्तुसामान्यन्वहमधीते स सोमघृतैर्देवान्पितृंश्चमधुसर्पिभ्यांतर्पयति । यः पुनः शक्तितोऽन्वहंअथर्वाङ्गीरसोऽधीते स देवान्मेदसापितृंश्चमधुसर्पिभ्यांतर्पयति । तेतृप्ताःसन्तोदेवाःपितरश्च एवं स्वाध्यायकारिणंसर्वकामफलैःशुभैरनन्योपघातलक्षणैस्त-र्पयन्ति । यस्ययस्यक्रतोःप्रतिपादकंवेदैकदेशमन्वहंअधीतेतस्य-तस्यक्रतोःफलमाप्नोति । तथा वित्तपूर्णायाःपृथिव्याः दानंयत्फलंभवतितत्फलंनित्यंस्वाध्यायवानाप्नोतीतीतिज्ञायते । अतः वेदव्रतादेशादीनि अत्यन्त आवश्यक आचरणकर्माणीति-सिद्धंभवति ।

संदर्भः


1. याज्ञवल्क्यस्मृतिः 1.15
2. पारस्करगृह्यसूत्रम् .2.5.13
3. पारस्करगृह्यसूत्रम् .2.6.3
4. पारस्करगृह्यसूत्रम् गदाधरभाष्यम् 2.5.1
5. याज्ञवल्क्यस्मृतिः 1.50
6. याज्ञवल्क्यस्मृतिः 1.41-48